श्री महालक्ष्मी कवचं

श्री गणेशाय नमः ।
अस्य श्रीमहालक्ष्मीकवचमंत्रस्य ब्रह्मा ऋषिः गायत्री छंदः
महालक्ष्मीर्देवता महालक्ष्मीप्रीत्यर्थं जपे विनियोगः ।
इंद्र उवाच । समस्तकवचानां तु तेजस्वि कवचोत्तमं ।
आत्मरक्षणमारोग्यं सत्यं त्वं ब्रूहि गीष्पते ॥1॥

श्रीगुरुरुवाच । महालक्ष्म्यास्तु कवचं प्रवक्ष्यामि समासतः ।
चतुर्दशसु लोकेषु रहस्यं ब्रह्मणोदितं ॥2॥

ब्रह्मोवाच । शिरो मे विष्णुपत्नी च ललाटममृतोद्भवा ।
चक्षुषी सुविशालाक्षी श्रवणे सागरांबुजा ॥3॥

घ्राणं पातु वरारोहा जिह्वामाम्नायरूपिणी ।
मुखं पातु महालक्ष्मीः कंठं वैकुंठवासिनी ॥4॥

स्कंधौ मे जानकी पातु भुजौ भार्गवनंदिनी ।
बाहू द्वौ द्रविणी पातु करौ हरिवरांगना ॥5॥

वक्षः पातु च श्रीर्देवी हृदयं हरिसुंदरी ।
कुक्षिं च वैष्णवी पातु नाभिं भुवनमातृका ॥6॥

कटिं च पातु वाराही सक्थिनी देवदेवता ।
ऊरू नारायणी पातु जानुनी चंद्रसोदरी ॥7॥

इंदिरा पातु जंघे मे पादौ भक्तनमस्कृता ।
नखान् तेजस्विनी पातु सर्वांगं करुणामयी ॥8॥

ब्रह्मणा लोकरक्षार्थं निर्मितं कवचं श्रियः ।
ये पठंति महात्मानस्ते च धन्या जगत्त्रये ॥9॥

कवचेनावृतांगनां जनानां जयदा सदा ।
मातेव सर्वसुखदा भव त्वममरेश्वरी ॥10॥

भूयः सिद्धिमवाप्नोति पूर्वोक्तं ब्रह्मणा स्वयं ।
लक्ष्मीर्हरिप्रिया पद्मा एतन्नामत्रयं स्मरन् ॥11॥

नामत्रयमिदं जप्त्वा स याति परमां श्रियं ।
यः पठेत्स च धर्मात्मा सर्वान्कामानवाप्नुयात् ॥12॥

॥इति श्रीब्रह्मपुराणे इंद्रोपदिष्टं महालक्ष्मीकवचं संपूर्णं ॥